# 2017

## M.A. Part - I

## SANSKRIT

### PAPER–I

*Full Marks* : 100

*Time* : 4 Hours

*The figures in the right hand margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

**[First Half : 60 Marks]**

1. अधोलिखितेषु मन्त्रेषु ऋषिच्छन्दोदेवता-निर्देशपूर्वकं मन्त्रद्वयस्य सायणदिशा संस्कृतभाषया व्याख्या कार्या - 8×2

(a) अग्निर्होता कविक्रतुः
सत्यश्चित्रश्रवस्तमः।
देवो देवेभिरागमत्।।

(b) मित्रं हुवे पूतदक्षं
वरुणं च रिशादशम्।
धियं घृताचीं साधन्ता।।

(c) तस्माद्यज्ञात् सर्वहुत
ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्मा-
द्यजुस्तस्मादजायत।।

(d) सुषारथिरश्वानिव यन्मनुष्या-
न्नेनीयतेऽभीशुभिर्वाजिन इव।
हृत्प्रतिष्ठं यदजिरं जविष्ठं
तन्मे मनः शिवसङ्कल्पमस्तु॥

(e) अशंवाधं बध्यतो मानवानां
यस्या उद्वतः प्रवतः समं बहु।
नाना वीर्या ओषधीर्या बिभर्ति
पृथिवी नः प्रथतां राध्यतां नः॥

2. अधोलिखिताषु भाष्यपंक्तिषु कयोश्चित् द्वयोः व्याख्या कार्या - 4×2

(a) तस्मिन्सूक्ते प्रथमाया ऋचो द्वितीयस्यां पवमानेष्टौ स्विष्टकृतो याज्यात्वेन विनियोगः।

(b) अग्नीषोमप्रणयने 'उप त्वाग्ने' इत्यादिकोऽनुवचनीयस्तृचः।

(c) वायव्ये तृचे प्रथमा ग्रहस्यैन्द्रवायवस्यैका पुरोऽनुवाक्या।

(d) आश्विनस्तृचः प्रातरनुवाकस्याश्विने क्रतौ विनियुक्तः।

अथवा

निम्नलिखितमन्त्रेषु द्वयोः भावार्थः संस्कृतभाषया विलिख्यताम् -

(a) ऋतेन मित्रावरुणा-
वृतावृधावृतस्पृशा।
क्रतुं बृहन्तमाशाथे॥

(b) ओमासश्चर्षणीधृतो
विश्वे देवास आ गत।
दाश्वांसो दाशुषः सुतम्॥





(c) यत्प्रज्ञानमुत चेतो धृतिश्च
यज्ज्योतिरन्तरमृतं प्रजासु।
यस्मान्न ऋते किञ्चन कर्म क्रिय-
ते तन्मे मनः शिवसङ्कल्पमस्तु॥

(d) सत्यं बृहद् ऋतमुग्रं दीक्षा तपो
ब्रह्मयज्ञः पृथिवीं धारयन्ति।
सा नो भूतस्य भव्यस्य पत्न्यु-
रूत्योकं पृथिवी नः कृणोतु।

3. सरस्वतीदेवतायाः इन्द्रदेवतायाः वा वेदगतं वैशिष्ट्यं प्रतिपाद्यताम्। 8

अथवा

नासदीयसूक्तस्य दार्शनिकतत्वं विविच्यताम्।

4. अधोलिखितेषु पदेषु द्वयोः व्याकरणदिशा साधन-प्रक्रिया प्रदर्श्यताम्- 4×2
रत्नधातमम्, दीदीविम्, श्रुधी, अशनवत्, द्रवंत्पाणी।

अथवा

प्रथमप्रश्नान्तर्गतस्य कस्यचिदेकस्य मन्त्रस्य पदपाठं प्रदर्श्य यथेच्छं द्वयोः पदयोः सूत्रोल्लेखपूर्वकं स्वराः सध्यन्ताम्।

5. शतपथब्राह्मणानुसारं ब्रह्मयज्ञस्वरूपं सम्यगालोच्यताम्। 10

अथवा

शुनःशेपोख्यानं कस्य ब्राह्मणभागस्यान्तर्गतम्? 1+1+8
शुनःशेपः कः? शुनःशेपोपाख्यानं प्राचीनभारतवर्षे पुरुषमेधस्य उदाहरणमेकं न वेति आलोच्यतम्।

6. उपनिषच्छब्दस्यार्थं निरूप्य कठोपनिषदि नचिकेतसा प्रार्थितस्य प्रथमवरस्य स्वरूपं प्रतिपाद्यताम्। 10

अथवा

बृहदारण्यकोपनिषदि मैत्रैयी-याज्ञवल्क्ययोर्यः संवादः समुपलभ्यते सः सरसतया समुपवर्ण्यताम्।

**[Second Half - 40 Marks]**

1. **अधोलिखितेषु निरुक्तवचनेषु द्वयोर्व्याख्या यास्कदिशा विधेया-** **8×2=16**

(a) भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि।

(b) शास्त्रकृतो योगश्च।

(c) अणीयस्त्वाच्च शब्देन संज्ञाकरणं व्यवहारार्थं लोके।

(d) उच्चावचेष्वर्थेषु निपतन्ति।

अथवा

के तावद् भावविकाराः? विषयेऽस्मिन् आचार्ययास्केन यथा निरुक्तं तत्सर्वं वैशद्येन प्रतिपाद्यताम्।

2. अधोनिर्दिष्टेषु पदेषु यथेच्छं त्रयाणां निर्वचनं यास्कदिशा प्रस्तूयताम्।
वीरः आदित्यः, वाक्, ह्रदः, वैश्वामित्रः। 3×3=9

3. वेदगत-मन्त्रभागस्य प्रामाण्यमस्ति न वेति सायणदिशा उपस्थाप्यताम्। 15

अथवा

'लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिः' इति न्यायाद्वेदस्य लक्षणं प्रमाणं चास्ति न वेति सायणदिशा सयुक्तिकं विचार्यताम्।

—o—